संस्कृत-वार्ता:

इयम् आकाशवाणी

दिनाङ्क : 12/12/2025 सायम् - 06:20

मुख्यवार्ता:

- केन्द्रीयमन्त्रिमण्डलेन विंशति-सप्तविंशतितमवर्षस्य जनगणनायाः कृते प्रायः पादोन द्वादशसहस्र- कोटिरूप्यकाणां आयव्ययिकस्य अनुमोदनं कृतम्।
- सर्वकारः अवोचत्, लोकसभायां वायु-प्रदूषणस्य विषये चर्चां कर्तुं सर्वकारः सज्जः अस्तीति।
- राष्ट्रपतिः द्रौपदी मुर्मु मणिपुरस्य सेनापति-मण्डले षट् विकास-परियोजनानां उद्घाटनम् अकरोत्।
- निर्वाचन-आयोगः अष्टसु राज्येषु निर्वाचक-सूच्यां विशेष-गहन-संशोधनस्य निरीक्षणार्थं विशेष-अनुक्रमणिका-पर्यवेक्षकाणां नियुक्तिं कृतवान्।
- अंतः नवदशवयसां क्रिकेट्-क्रीडायां दुबई-नगरे एशिया-कप इति-क्रीडायाः आरम्भिक-क्रीडायां भारतं यूएई इति देशं अजयत्।

लोकसभा वायु प्रदूषणम्

संसदीयकार्यमन्त्री किरेन रिजिजूः अवदत् यत् लोकसभायां वायु-प्रदूषणस्य विषये चर्चायै सर्वकारः सज्जः अस्ति। सः अवदत् यत् व्यवसाय-परामर्शद-समितेः विपक्षनेतृभिः विषयोऽयं समुत्थापितः इति कारणात्, सर्वकारेण तस्य विषये विचारः करणीयः, तथा च नियमान्तर्गतं चर्चायाः संरचना कथं भविष्यतिती च द्रष्टव्यम् भविष्यति। मन्त्री इतोऽपि अवदत् यत् प्रथमदिवसे एव सर्वकारः स्वपक्षं

बहु स्पष्टं कृतवान् यत् सर्वेषु महत्त्वपूर्ण-विषयेषु सर्वकारः विपक्षदलानां सूचनानि स्वीकृत्य चर्चायै, समाधानम् अन्वेष्टुं सज्जः अस्तीति।

बाइट-किरेन रिजिजू - 30 से

शून्यकाले प्रकरणमिमम् उत्थापयन् विपक्षस्य नेता राहुलगान्धी अवदत् यत् महत्त्वपूर्णमिदं प्रकरणम् अस्ति, यस्य साम्मुख्यं देशः अधुना करोति, इदञ्च विचारधारात्मकविषयोऽपि नास्तीति आशास्यते। एतन्मध्ये केन्द्रीयमन्त्रिमण्डलेन विंशति-सप्तविंशतितमवर्षस्य जनगणनायाः कृते प्रायः पादोन द्वादश-कोटिरूप्यकाणां आयव्ययिकस्य अनुमोदनं कृतम्।

<u>मणिपुर राष्ट्रपति-नुपि-लाल दिवसः</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य मणिपुरस्य सेनापतिमण्डलं गत्वा मण्डले कार्यान्विताः भिन्नाः षट्-विकासपरियोजनाः उद्घाटितवती। सा मणिपुरस्य एकमात्रस्य मरम् इति सामाजिकरूपेण निर्बलभूतस्य जनजातेः नेत्रा सह अपि मिलित्वा वार्तालापं कृतवती। बहुउद्देशीय-सभामण्डपे जनसमूहं सम्बोधयन्ती राष्ट्रपतिः द्रौपदी मुर्मुः उक्तवती यत् पी. एम. जनमन इति योजनान्तर्गतं जनजातीय-समुदायस्य विशेषतः पी. वी. टी. जी. इत्येतस्य उत्थानार्थं अनेके उपक्रमाः आरब्धाः सन्तीति।

<u>निर्वाचन-आयोगः</u>

निर्वाचन-आयोगः अष्टसु राज्येषु निर्वाचक-सूच्यां विशेष-गहन-संशोधनस्य निरीक्षणार्थं विशेष-अनुक्रमणिका-पर्यवेक्षकाणां नियुक्तिं कृतवान्।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

राज्यसभा सस्योत्पादनम्

विगतदशवर्षेषु देशे सस्योत्पादनं चतुश्चत्वारिंशत्प्रतिशतं वर्धितमस्तीति सर्वकारः अवदत्। राज्यसभायां अद्य प्रश्नोत्तरकाले अनुपूरक-प्रश्नस्योत्तरे केन्द्रीयकृषि-कृषक-कल्याणमन्त्री शिवराज-सिङ्घ-चौहानः अवदत् यत्, चतुर्दशोत्तर-द्विसहस्रतमवर्षतः चतुर्विंशत्युत्तर-द्विसहस्रतमवर्ष-पर्यन्तं नूतन-बीजप्रकारैः, आधुनिक-प्रौद्योगिकिना, उन्नतकृषि-पद्धत्या च एतत् सम्भवम् अभवदिति। सः अवदत् यत्, सर्वकारः कृषिक्षेत्रे सर्वसमावेशकविकासाय निरन्तरं प्रयतमानः अस्ति। श्री. चौहानः अवदत् यत्, मोदी-सर्वकारः कृषकाणां आयं वर्धयितुं समग्रकृषि-वृद्धिं प्रवर्धयितुं च केन्द्रितः अस्ति।

[S/B-Shivraj Singh SI-18 SECS]

ए. पी.-बसयान दुर्घटना

आन्ध्रप्रदेशस्य अल्लूरी-सीता-रामराजु-मण्डले अद्य प्रातः घटितायां बसयान-दुर्घटनायां मृतानां सङ्ख्या नव यावत् वर्धिताऽस्ति। दुर्घटनायां प्रायः द्वाविंशति-जनाश्च व्रणिताः अभवन्। दुर्घटनाकाले आहत्य पञ्चत्रिंशत् यात्रिकाः, द्वौ चालकौ च आसन्। बस-यानस्य चालकस्य नियन्त्रणं नष्टम् अभवत्, तथा च वाहनं मार्गात् अधः गिरिषु पतित्वा उत्तानचक्रिका च जाता इति कथ्यते। तुलसीपाका-ग्रामं निकषा चिन्तूरु-मेरेडुमिल्ली-घाट-मार्गे समीपस्थं तेलङ्गाना-राज्यं प्रति गच्छत् बस-यानम् आसीत् तदा एषा घटना घटिता। स्थानीयाः निवासिनः

आरक्षकाश्च रक्षणार्थं आगताः, अपि च व्रणिताः जनाः चिन्तूरु-क्षेत्र-चिकित्सालयं प्रति स्थानान्तरिताः। मुख्यमन्त्री चन्द्रबाबु नायडुः अस्याः दुःखद-घटनायाः विषये शोकं दुःखं प्रकटितवान्। राज्यपालः एस. अब्दुल- नजीरः बस्-दुर्घटनायां गभीरं दुःखं च प्रकटितवान्। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णनवर्यः, प्रधानमन्त्री नरेन्द्र मोदी च विषयेऽस्मिन् शोकं प्रकटितवन्तः।

<u>दिवंगतः शिवराज- पाटिलः</u>

काङ्ग्रेस्-दलस्य वरिष्ठः नेता पूर्व-केन्द्रीय-गृहमन्त्री च शिवराज-पाटिलः अद्य लातूर्-नगरे एकनवतितमे वयसि दिवङ्गतः। राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्र मोदी च पूर्वकेन्द्रीयमन्त्रिणः शिवराज पाटिलवर्यस्य निधने शोकभरितभावान् प्रकटितवन्तः। सामाजिक-प्रसार-माध्यमे राष्ट्रपतिः उक्तवती यत्, स्वस्य दीर्घ-सार्वजनिक-जीवनकाले, श्री-पाटिलः लोकसभायाः अध्यक्षः, केन्द्रीय-मन्त्री, राज्यपालः, दीर्घकालं यावत् संसदसदस्यश्च आसीदिति।

<u>राज्यसभा-लोकसभा शोक संवेदना</u>

राज्यसभायां सभापतिः सी. पी. राधाकृष्णन् वर्यः अवदत् यत् एकोत्तरद्विसहस्र-तमवर्षस्य दिसेम्बर-मासस्य त्रयोदश-दिनाङ्कः इतिहासस्य कलङ्कित-दिवसः आसीत्, यदा भारतीय- लोकतन्त्रस्य प्रतीकस्थलं संसदभवनमेव आततायिभिः लक्ष्यीकृत्य देशस्य आधारे प्रहारः कृतः। अद्य तस्मिन् प्रकरणे वीरगतिं प्राप्तभटेभ्यः श्रद्धांजलिः सदनद्वयेन दत्ता।

<u>भाजपा-प्रेस सम्मेलनम्</u>

भाजपेति दलेन अद्योक्तम् यत् काङ्ग्रेस्-दलम् निमज्जनशीलः जलपोतः अस्तीति । दलेन अग्रे उक्तं यत् कांग्रेसदलस्य कटक-क्षेत्रस्य पूर्व-विधायकस्य मोहम्मद् मुकिम इत्यादीनां नेतॄणां वक्तव्यं तत् सिद्धयति अपि। नवदेहल्यां पत्रकारसम्मेलने काङ्ग्रेस्-नेत्रा लिखितस्य पत्रस्य उल्लेखं कुर्वन् भाजपा-पक्षस्य प्रवक्ता प्रेमशुक्लः अवदत् यत् बहवः काङ्ग्रेस्-नेतारः दलस्य असफल-नेतृत्व-विषये पौनःपुन्येन चिन्तां प्रकटयन्तीति।

क्रि केट U-19 एशिया कप

अंतः नवदशवयसां क्रिकेट्-क्रीडायां चतुश्त्रिंशदुत्तरचतुश्शत-धावनाङ्कानां लक्ष्यस्य अनुसरणं कुर्वन्तः यू. ए. ई. इति देशीयं दलं दुबई-नगरे एशिया-कप इति-क्रीडायाः आरम्भिक-क्रीडायां भारतं विरुध्य एकोनद्विशतधावनाङ्केषु एव पराभूतम्, चतुस्त्रिंशदुत्तरद्विशतधावनांकैश्च भारतेन क्रीडेयं विजिता च। यत्र वैभव् सूर्यवंशी इत्यनेन केवलं पञ्चनवति कन्दुकेषु अत्युत्कृष्टतया एकसप्तत्युत्तरैकशतधावनांकाः रचिताः।

।। इति वार्ताः ।।